# Paushyamasakrite Shiva Stuti Masa10

# पौष्यमासकृते शिवस्तुतिः मास १०

## Document Information

Text title : Paushyamasakrite Shiva Stuti Masa 10

File name : pauShyamAsakRRiteshivastutiHmAsa10.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mahAdevAkhyaH ekAdashamAMshaH | adhyAyaH 23 pauShyamAsArchanam | 85-92||

Latest update : October 29, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2024

*sanskritdocuments.org*

# पौष्यमासकृते शिवस्तुतिः मास १०

(शिवरहस्यान्तर्गते महादेवाख्ये)

- शिवगौरीसंवादे -

दुर्वारदुःखशमनाय भवौषधाय
संसारवारां निधितारकाय ।
सर्वेश्वरायैव दयामयाय
वेदान्तवेद्याय नमः शिवाय ॥ ८५॥

जाग्रत्सुषुप्त्याद्यविदूरकाय
सुखान्यदुःखान्यफलप्रदाय ।
वेदान्तवेद्याय बलाबलाय
वर्ष्याय रेषया(रेष्म्याय) नमः शिवाय ॥ ८६॥

उग्राय भीमाय सनातनाय
रुद्राय देवाय सदाशिवाय ।
शिवाय शर्वाय हराय शम्भवे
श्रीनीलकण्ठाय नमः शिवाय ॥ ८७॥

व्यालोरुमालाय पिताकपाणये
त्रिशूलहस्ताय कपालमालिने ।
भवाय भव्याय दयामयाय
भक्तानुरक्षाय नमः शिवाय ॥ ८८॥

सद्याय वामाय अघोरमूर्तये
तत्पूरुषाय च ईशमूर्तये ।
सर्वानु भावाय जगत्स्वरूपिणे
हिताय मेध्याय नमः शिवाय ॥ ८९॥

- -

स्तवमेनं प्रयुञ्जीत पौष्ये पुष्टिप्रदं शिवे ।
दद्याद्गोमिथुनं रक्तं सवत्सं दक्षिणान्वितम् ॥ ९० ॥

शाम्भवेभ्यस्तथा होमं कुर्यात्पर्वणि भोजनम् ।
ब्राह्मणैर्बान्धवैर्देवि भुञ्जीतैव स वाग्यतः ॥ ९१ ॥

राजतेन विमानेन यात्यन्ते मम सन्निधिम् ।
यस्त्वेतच्छृणुयान्नित्यं सोऽपि तत्फलमाप्नुयात् ॥ ९२ ॥

॥ इति शिवरहस्यान्तर्गते ईश्वरप्रोक्तं पौष्यमासकृते शिवस्तुतिः सम्पूर्णा ॥

- ॥ श्रीशिवरहस्यम् । महादेवाख्यः एकादशमांशः । अध्यायः २३ पौष्यमासार्चनम् । ८५-९२ ॥

- .. shrIshivarahasyam . mahAdevAkhyaH ekAdashamAMshaH . adhyAyaH 23 pauShyamAsArchanam . 85-92..

Notes:

Śiva शिव advises to Devī देवी; the ŚivaStutiḥ शिवस्तुतिः for the māsa मास while detailing about His Worship during the Pauṣya māsa पौष्य मास. He mentions about conducting Homam होमम् during Pauṣya Pūrṇimā पौष्य पूर्णिमा.

The Pauṣyamāsakṛte ŚivaŚatāṣṭanāmaStotram पौष्यमासकृते शिवशताष्टनामस्तोत्रम् and the Pauṣyamāsakṛte ŚivaŚatāṣṭaNāmāvaliḥ पौष्यमासकृते शिवशताष्टनामावलिः comprising of 108 Names १०८ नामानि of Śiva शिव, derived from the same can be accessed from one of the links provided below. The count from the source text comes to less than 108 though. Perhaps there are/were meant to be more Śloka-s.

More details about worshiping Śiva शिव during individual Māsa मास are given in Chapters 13-25.

Selected Śloka-s श्लोकाः from Chapter 23 are presented on this page.

Proofread by Ruma Dewan

pdf was typeset on November 2, 2024

Please send corrections to *sanskrit@cheerful.com*